# Vakratunda Stuti Sadevarshibrahmakrita

# સદેવર્ષિબ્રહ્મકૃતા વક્રતુણ્ડસ્તુતિઃ

## Document Information

Text title : Vakratunda Stuti Sadevarshibrahmakrita

File name : vakratuNDastutiHsadevarShibrahmakRRitA.itx

Category : ganesha, mudgalapurANa, stuti, ekAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM prathamaH khaNDaH | adhyAyaH 43 | 1.43 18-36||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# સદેવર્ષિબ્રહ્મકૃતા વક્રતુણ્ડસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
સદેવર્ષિબ્રહ્મોવાચ ।
નમસ્તે બ્રહ્મભૂતાય વક્રતુણ્ડાય સાક્ષિણે ।
સિદ્ધિબુદ્ધિયુતાયૈવ ગણેશાય નમો નમઃ ॥ ૧૮॥
વિઘ્નેશાય નમસ્તુભ્યં નિર્ગુણાય ગુણાત્મને ।
અનાદયે ચ સર્વજ્ઞ પાલકાય નમોઽસ્તુ તે ॥ ૧૯॥
નમસ્તે સર્વરૂપાય સર્વાધ્યક્ષાય ધીમતે ।
આદિમધ્યાન્તહીનાય સાક્ષાદ્દેવાય તે નમઃ ॥ ૨૦॥
અમેયશક્તયે તુભ્યં માયિભ્યો મોહદાય ચ ।
અમાયિને ચ માયાયા આધારાય નમો નમઃ ॥ ૨૧॥
સત્યાય સત્યરૂપાય સત્યપાલક રક્ષિણે ।
જ્ઞાનાય જ્ઞાનદાત્રે ચ જ્ઞાનગમ્યાય તે નમઃ ॥ ૨૨॥
લમ્બોદરાય દેવાય ગણાનાં પતયે નમઃ ।
ગણેશાય ગુણાધાર હેરમ્બાય નમો નમઃ ॥ ૨૩॥
ત્વાં સ્તોતું ન સમર્થાશ્ચ વેદાઃ શાસ્ત્રસમન્વિતાઃ ।
યોગીન્દ્રા દેવમુખ્યાશ્ચ તત્ર કોઽહં ગજાનન ॥ ૨૪॥
યથાબુદ્ધિ પ્રમોદેન સંસ્તુતોઽસિ ગણેશ્વર ।
તેન મે સફલં સર્વં જાતં લમ્બોદરાધુના ॥ ૨૫॥
બ્રહ્માણ્ડાનામનન્તાનાં કારકસ્ત્વં ન સંશયઃ ।
કથં મે પુત્રતાં યાતઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૨૬॥
સિદ્ધિબુદ્ધિયુતં બ્રહ્મ હૃદિ ધ્યાતં વિશેષતઃ ।
તદેવ બહિરાયાતં તારિતું માં ન સંશયઃ ॥ ૨૭॥
ઇત્યુક્ત્વા બ્રાહ્મણૈઃ સાર્ધં જાતકર્માદિકાં ક્રિયામ્ ।
ચકાર ચ સ્વયં બ્રહ્મા પરમાનન્દસંયુતઃ ॥ ૨૮॥
એકાદશદિને તસ્ય સિદ્ધિબુદ્ધિપતિસ્ત્વિતિ ।

નામ સંસ્થાપયામાસ દ્વિજૈઃ સહ પિતામહઃ ॥ ૨૯॥
બાલક્રીડનભાવેન ક્રીડતિ સ્મ વિનાયકઃ ।
સાવિત્રી સ્તનપાનં સા કારયામાસ ભાવતઃ ॥ ૩૦॥
દિને દિનેઽથ બાલોઽસૌ વવૃધે શુક્લચન્દ્રવત્ ।
આનન્દં જનયન્ માતુઃ પિતુશ્ચ ચરિતૈઃ સ્વકૈઃ ॥ ૩૧॥
સિદ્ધિબુદ્ધિયુતો દક્ષ વર્ષદ્વયવયાઃ સ્થિતઃ ।
એકદા તં વિધાતારં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૩૨॥
સિદ્ધિબુદ્ધિપતિરુવાચ ।
તાત કિં વનવાસં ત્વં કરોષિ મુનિભિઃ સહ ।
દેવૈઃ પરમદુઃખાર્તો મમ કિં ભાસસે પ્રભો ॥ ૩૩॥
તસ્ય તદ્વચનં શ્રુત્વા બ્રહ્મા હર્ષસમન્વિતઃ ।
જગાદ ગણપં સર્વં વૃત્તાન્તં દૈત્યસમ્ભવમ્ ॥ ૩૪॥
તચ્છ્રુત્વા કોપદીપ્તોઽસૌ વક્રતુણ્ડસ્તમબ્રવીત્ ।
હર્ષયન્ દેવવિપ્રાદીન્ મેઘગમ્ભીરનિસ્વનઃ ॥ ૩૫॥
વક્રતુણ્ડ ઉવાચ ।
દમ્ભાસુરં મહાવીર્યં હનિષ્યામિ ન સંશયઃ ।
દેવેભ્યો બ્રાહ્મણેભ્યશ્ચ સ્વપદાનિ દદામ્યહમ્ ॥ ૩૬॥

ઇતિ સદેવર્ષિબ્રહ્મકૃતા વક્રતુણ્ડસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પ્રથમઃ ખણ્ડઃ । અધ્યાયઃ ૪૩ । ૧.૪૩ ૧૮-૩૬॥

- .. mudgalapurANaM prathamaH khaNDaH . adhyAyaH 43 . 1.43 18-36..

Proofread by Yash Khasbage, Preeti Bhandare

*Vakratunda Stuti Sadevarshibrahmakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*